Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ सिद्धभैरवमन्त्रः —

शङ्कर ऋषिः । संकृतिः छन्दः । सिद्धभैरवो देवता । भं बीजम् । श्रीं शक्तिः । मोहने । भां ह्रां इत्यादिना करन्यासः । तेनैव षडङ्गं च ।

जलदपटलनीलं दीप्यमानोर्ध्वकेशं
त्रिशिखडमरुहस्तं चन्द्ररेखावतंसम् ।
विमलवृषनिरूढं चित्रशार्दूलवासं
विजयमनिशमीडे विक्रमोद्दण्डचण्डम् ॥

ओं नमो भगवते विजयभैरवाय प्रळयान्तकाय महाभैरव्यै(महाभैरवीपतये) महाभैरवाय सर्वविघ्ननिवारणाय शक्तिधराय चक्रपाणये वटमूलसन्निषण्णाय अखिलगणनायकाय आपदुद्धारणाय आकर्षयाकर्षय आवेशयावेशय मोहय मोहय भ्रामय भ्रामय भापय भापय शीघ्रं भापय ह्रूं ह्रीं त्रिपुरताण्डवाय अष्टभैरवाय* स्वाहा ॥

शान्तं त्रिमुखमालिख्य तेन संवेष्ट्य सर्वतः ।
अथो शूलं त्रिपार्श्वे च यन्त्रं विजयमद्भुतम् ॥

एतद्यन्त्रं लिखित्वा तन्मन्त्रेणानेन मन्त्र्य तत् ।
भस्मदर्शनमात्रेण क्षणादावेशमाप्नुयात् ॥

त्रिबिन्दुयुक्तं पकारं विलिख्य, अन्त्यबिन्दुरेखाग्रेण परितस्संवेष्ट्य, तस्य पार्श्वे शूलद्वयं विलिखेत् । एतद्यन्त्रं भस्मनि विलिख्य भैरवमन्त्रं जप्त्वा तद्भस्म क्षिपेत् । आवेशो भवति ॥